# shrIchyutapurIshAShTottarashatanAmAvaliH

# श्रीच्युतपुरीशाष्टोत्तरशतनामावलिः

## Document Information

Text title : chyutapurIshAShTottarashatanAmAvalI

File name : chyutapurIshAShTottarashatanAmAvalI.itx

Category : aShTottarashatanAmAvalI, shiva, nAmAvalI

Location : doc_shiva

Transliterated by : Shivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Shivakumar Thyagarajan, PSA Easwaran

Source : Sri Niyama Kshetra Mahatmyam

Acknowledge-Permission: Matangi Publications, http://svradhakrishnasastri.in

Latest update : May 19, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# श्रीच्युतपुरीशाष्टोत्तरशतनामावलिः

ॐ श्रीगणेशाय नमः ।
ॐ नमः शिवाय ।

ॐ श्रीमच्च्युतपुरेशानाय नमः ।
ॐ चन्द्रार्धकृतशेखराय नमः ।
ॐ कृत्तिवाससे नमः ।
ॐ कृत्तिभूषाय नमः ।
ॐ गजमस्तकनर्तकाय नमः ।
ॐ हराय नमः ।
ॐ नीलाम्बुदश्यामाय नमः ।
ॐ गणनाथैरभिष्टुताय नमः ।
ॐ गुरवे नमः ।
ॐ ज्ञानसभाधीशाय नमः ।
ॐ योगपट्टविराजिताय नम
ॐ विराडीशाय नमः ।
ॐ लिङ्गवपुषे नमः ।
ॐ कालारये नमः ।
ॐ नीलकन्धराय नमः ।
ॐ अट्टहासमुखाम्भोजाय नमः ।
ॐ विष्णुब्रह्मेन्द्रसन्नुताय नमः ।
ॐ कपालशूलचर्मासिनागढक्कालसद्भुजाय नमः ।
ॐ करिचर्मावृतिरतकरद्वयसमन्विताय नमः ।
ॐ तिर्यक्प्रकुञ्चितसव्यपादपद्ममनोहराय नमः । २०
ॐ हस्तिमस्तकनृत्तोद्यद्दक्षिणाङ्घ्रिसरोरुहाय नमः ।
ॐ आपादलम्बिमाणिक्यघण्टामालाविराजिताय नमः ।
ॐ बालाङ्कुराम्बिकालोक लोललोचनपङ्कजाय नमः ।

ॐ अम्बाकटियगाङ्गेयसूचिताय नमः ।
ॐ करुणानिधये नमः ।
ॐ पञ्चब्रह्मसरस्तीरविहाररसिकाय नमः ।
ॐ अनघाय नमः ।
ॐ रक्तपायिगणेशेड्याय नमः ।
ॐ नन्दिचण्डमुखस्तुताय नमः ।
ॐ गजासुरभयत्रस्तरक्षकाय नमः ।
ॐ गजदारणाय नमः ।
ॐ अभक्तवञ्चकाय नमः ।
ॐ भक्तस्वेष्टदायिने नमः ।
ॐ शिवेक्षणाय नमः ।
ॐ मूकवाचालकृते नमः ।
ॐ पङ्गुपददायिने नमः ।
ॐ मनोहराय नमः ।
ॐ आशाम्बराय नमः ।
ॐ भिक्षुवेषधारिणे नमः ।
ॐ नारीसुमोहनाय नमः । ४०
ॐ मोहिनीवेषधृग्विष्णुसहगाय नमः ।
ॐ विष्णुमोहकाय नमः ।
ॐ व्याघ्राजिनाम्बराय नमः ।
ॐ शास्तृजनकाय नमः ।
ॐ शास्तृदेशिकाय नमः ।
ॐ देवदारुवनान्तःस्थविप्रमोहनरूपधृते नमः ।
ॐ ईशानपेक्षफलदकर्मवादनिबर्हणाय नमः ।
ॐ क्षुद्रकर्मठविप्रौघमतिभेदनतत्पराय नमः ।
ॐ दारुकावनविप्रस्त्रीमोहनायत्तमाधवाय नमः ।
ॐ दारुकावनवासेच्छवे नमः ।
ॐ नग्नाय नमः ।
ॐ नग्नव्रतस्थिराय नमः ।
ॐ विष्णुप्राणेश्वराय नमः ।
ॐ विष्णुकलत्राय नमः ।
ॐ विष्णुमोहिताय नमः ।

ॐ महनीयाय नमः ।
ॐ दारुवनमुनिश्रेष्ठकृतार्हणाय नमः ।
ॐ अनसूयारुन्धतीड्याय नमः ।
ॐ वसिष्ठात्रिकृतार्हणाय नमः ।
ॐ विप्रसङ्घप्रेषिताश्मयष्टिलोष्टसुमर्दिताय नमः । ६०
ॐ द्विजप्रेरितवह्न्येणडमर्वह्निधराय नमः ।
ॐ अचलाय नमः ।
ॐ विप्राभिचारकर्मोत्थव्याघ्रचर्माम्बराय नमः ।
ॐ अमलाय नमः ।
ॐ अभिचारोत्थमत्तेभपार्श्वदारणनिर्गमाय नमः ।
ॐ पुंश्चलीदोषनिर्मुक्तविप्राङ्गनाय नमः ।
ॐ उदारधिये नमः ।
ॐ विनीतविप्रसगुणनिर्गुणब्रह्मबोधकाय नमः ।
ॐ वीराय नमः ।
ॐ अष्टवीर्यप्रथिताय नमः ।
ॐ वीरस्थानप्रथाकराय नमः ।
ॐ हृत्तापहृत्तीर्थगताय नमः ।
ॐ पर्वतेशाय नमः ।
ॐ अद्रिसन्निभाय नमः ।
ॐ ज्ञानामृतरस्तीरगताय नमः ।
ॐ तालवनेश्वराय नमः ।
ॐ शङ्खचक्राभिधहरिपुरोगाय नमः ।
ॐ स्कन्दसेविताय नमः ।
ॐ विश्वकर्मकृतानर्घव्याख्यापीठगदेशिकाय नमः ।
ॐ वाणीवरप्रदाय नमः । ८०
ॐ वाग्मिने नमः ।
ॐ वाणीपद्मभवार्चिताय नमः ।
ॐ जीवतारायोगदायिने नमः ।
ॐ देववैद्यकृतार्हणाय नमः ।
ॐ वातापील्वलहत्याघदूनागस्त्यप्रमोदनाय नमः ।
ॐ अश्वत्थबदरीदेवदारुवह्निवनालयाय नमः ।
ॐ कावेरीदक्षतीरस्थाय नमः ।

ॐ कण्वकात्यायनार्चिताय नमः ।
ॐ मूकमोचनतीर्थेशाय नमः ।
ॐ ज्ञानामृतसरोऽग्रगाय नमः ।
ॐ सोमापराधसहनाय नमः ।
ॐ सोमेशाय नमः ।
ॐ सुन्दरेश्वराय नमः ।
ॐ स्वान्तरनायक्याःपतये नमः ।
ॐ शनैश्चरमदापहाय नमः ।
ॐ ज्वालाश्रेणीश्वराय नमः ।
ॐ ज्ञानसभेशाय नमः ।
ॐ वीरताण्डवाय नमः ।
ॐ दत्तचोलेश्वराय नमः ।
ॐ वीरचोलेशाय नमः । १००
ॐ विक्रमेश्वराय नमः ।
ॐ कङ्कालेशाय नमः ।
ॐ मङ्गलेशाय नमः ।
ॐ कौतुकेशाय नमः ।
ॐ अग्निनायकाय नमः ।
ॐ पलाशपुष्पारण्यादिवासिने नमः ।
ॐ हेमगिरीश्वराय नमः ।
ॐ माघपञ्चाब्ददलगयन्त्रगोमेशविग्रहाय नमः । १०८

श्रीबालाङ्कुराम्बिकासमेतकृत्तिवासेश्वराय नमः ।

chyuta-puri is the exact Sanskrit translation of vazhu-voor. It is the famous shrine of Shiva as Gaja-samhaara-murti. It is called chyuta because it escaped/slipped the Pralaya and continued to exist.

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by Sivakumar Thyagarajan, PSA Easwaran

*shrIchyutapurIshAShTottarashatanAmAvaliH*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*